(अस्या जन्मादिविवरणन्तु महाभारते वनपर्व्वणि ६६ अध्यायमारभ्य द्रष्टव्यम् ॥)

लोपामुद्रापतिः, पुं, (लोपामुद्रायाः पतिः।) अगस्त्यमुनिः। इति पुराणम् ॥

लोपाशकः, पुं, (लोपं व्याकुलीभावं चकितमश्नाति। अश् + ण्वुल्।) शृगालः। इति हारावली ॥

लोपाशिका, स्त्री, (लोपाशक + स्त्रियां टाप्। अत इत्वम्।) शृगाली। इति हारावली। १७२ ॥

लोप्त्रं, क्ली, (लुप् + ष्ट्रन्।) स्तेयधनम्। लोतम्। इत्यमरः ॥ (यथा, महाभारते।१।१०७।५।
"ते तस्यावसथे लोप्त्रं दस्यवः कुरुसत्तम!।
निधाय च भयाल्लीनास्तत्रैवानागते बले ॥")

लोप्त्री, स्त्री, (लोप्त्र + षित्वात् ङीष्।) लोप्त्रम्। इति शब्दरत्नावली ॥

लोभः, पुं, (लुभ् + घञ्।) आकाङ्क्षा। परद्रव्याभिलाषः। तत्पर्य्यायः। तृष्णा २ लिप्सा ३ वशः ४ स्पृहा ५ काङ्क्षा ६ शंसा ७ गर्द्धः ८ वाञ्छा ९ इच्छा १० तृट् ११ मनोरथः १२ कामः १३ अभिलाषः १४। इति हेमचन्द्रः ॥*॥
तस्य लक्षणं यथा,—
"परवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते।
अभिलाषो द्विजश्रेष्ठ स लोभः परिकीर्त्तितः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥*॥
स च ब्रह्मणोऽधराज्जातः। यथा,—
"भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः।"
इति मात्स्ये सृष्ट्युत्पत्तिर्नाम ३ अध्यायः ॥*॥
स तु नाशकारणं यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यते त्रिभिः।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुड़े नीतिसारे ११५ अध्यायः ॥
अपि च।
"त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥"
इति श्रीभगवद्गीतायाम् १६ अध्यायः ॥
(लोभनिन्दाविषयकश्लोकानि यथा,—
"लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च।
द्वेषक्रोधादिजनको लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति लोभात्कामः प्रजायते।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥
लोभात् क्रोधः प्रभवति क्रोधाद्द्रोहः प्रवर्त्तते।
द्रोहेण नरकं याति शास्त्रज्ञोऽपि विचक्षणः ॥
मातरं पितरं पुत्त्रं भ्रातरं वा सुहृत्तमम्।
लोभाविष्टो नरो हन्ति स्वामिनं वा सहोदरम् ॥
लोभेन बुद्धिश्चलति लोभो जनयते तृषाम्।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥
लोभाविष्टो नरो वित्तं वीक्षते न स चापदम्।
दुग्धं पश्यति मार्ज्जारो यथा न लगुड़ाहतिम् ॥
प्रायेण धनिनामेव धनलोभो निरन्तम्।
पश्य कोटिद्वयोपेतं लक्षाय प्रणतं धनुः ॥
नात्यर्थमर्थार्थितया लुब्धमुद्वेजयेज्जनम्।
अब्धिर्दत्त्वाम्बरत्नं क्षीर्मथ्यमानोऽत्यजद्विषम् ॥
लोभः सदा विचिन्त्यो लुब्धेभ्यः सर्व्वतो भयं दृष्टम्।
कार्य्याकार्य्यविचारो लोभविमूढ़स्य नास्त्येव ॥
सत्यप्रशमतपोभिः शब्दधनैः शास्त्रवेदिभिर्विजितः।
लोभो वत प्रविष्टः कुटिलं हृदयं किरातीनाम् ॥
स्नेहोपपन्न इति पूर्णदशाविशेषशाली स्वमात्मनि वसुप्रकरं निधाय।
लब्धोदये तमथ गृह्णति पद्मबन्धौ
दीपा भवन्ति कलुषा बलवान् हि लोभः ॥
यद्दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं
गाहन्ते गहनं समुद्रमथनक्लेशं कृषिं कुर्व्वते।
सेवन्ते कृपणं पतिं गजघटासङ्घट्टदुःसञ्चरं
सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्ज्जितम् ॥" * ॥)

लोभी, [न्] त्रि, (लोभोऽस्यास्तीति। लोभ + इनिः।) लोभयुक्तः। तत्पर्य्यायः। गृध्नुः २ गर्द्धनः ३ लुब्धः ४ अभिलाषुकः ५ तृष्णकः ६ लोलुपः ७ लोलुभः ८। इति जटाधरः ॥ लिप्सुः ९। इति हेमचन्द्रः ॥

लोभ्यः, पुं, (लुभ्यते इति। लुभ + यत्।) मुद्गः। इति हेमचन्द्रः ॥ लोभनीये, त्रि ॥

लोम, [न्] क्ली, (लूयते छिद्यते इति। लू + "नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन्।" उणा० ४। १५०। इति मनिन्प्रत्ययेन साधुः।) शरीरस्थकेशः। तत्पर्य्यायः। तनूरुहम् २ रोम ३। इत्यमरः ॥ तनुरुहम् ४ तनुरुट् ५। इति शब्दरत्नावली ॥ (यथा, मुण्डकोपनिषदि। १। १। ७।
"यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम् ॥")
तत्तु गर्भस्थस्य षष्ठे मासि भवति। इति मुग्धबोधः ॥ अपि च।
"षष्ठे मासि च नारीणां वैदिके नाधिकारिता।
उदरस्थस्य बालस्य नखलोमप्रवर्त्तनात् ॥"
इति स्मृतिः ॥
(तथास्य विवृतिः।
"श्मश्रूणि मलानि लोमानि असङ्ख्यानि भवन्ति हि।
सन्ति यावन्ति लोमानि तावन्तो लोमकूपकाः ॥
अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते।
सन्निवेशश्च गात्राणां नात्रास्ते कारणान्तरम् ॥"
निर्वृत्तिः सिद्धिः स्वभावात् ईश्वरात्। सन्निवेशो रचनाविशेषः। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लोमं, क्ली, लाङ्गूलम्। इति जटाधरः ॥ (रोम। यथा, तैत्तिरीयसंहितायाम्। ५। १। ६। २।
"अथो शन्त्वायाजलोमैः संसृजत्येषा वा अग्नेः प्रिया तनूर्यदजेति ॥")

लोमकर्णी, स्त्री, मांसच्छदा। इति राजनिर्घण्टः ॥

लोमकर्णः, पुं, (लोमयुक्तौ कर्णौ यस्य।) शशकः। इति हेमचन्द्रः ॥ (अस्य पर्य्यायो यथा,—
"लम्बकर्णः शशः शूली लोमकर्णो विलेशयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥) लोमयुक्तकर्णविशिष्टे, त्रि ॥

लोमघ्नं, क्ली, (लोमानि हन्तीति। हन + टक्।) इन्द्रलुप्तकम्। इति भूरिप्रयोगः ॥ टाक इति भाषा ॥ लोमघातके, त्रि ॥

लोमपादः, पुं, (लोमानि पादयोर्यस्य।) अङ्गदेशीयराजविशेषः। स तु ऋष्यशृङ्गमुनिश्वशुरः। इति रामायणम् ॥ (अयं हि सूर्य्यवंशावतंसस्य दशरथस्य सखा। विप्रावमाननात एवास्य राष्ट्रे बहुकालं अवग्रहः सम्बभूव तत एवासौ काश्यपं ऋष्यशृङ्गं स्वराष्ट्रे आनीय शान्तां नाम दशरथकन्यामस्मै दत्तवान्। एतद्वृत्तान्तन्तु महाभारते वनपर्व्वणि ११० अध्यायतो विशेषतो द्रष्टव्यम् ॥)

लोमपादपूः, स्त्री, (लोमपादस्य पूः।) पुरीविशेषः। अधुना भागलपुर इति ख्याता। तत्पर्य्यायः। चम्पा २ मालिनी ३ कर्णपूः ४। इति हेमचन्द्रः ॥

लोमफलं, क्ली, (लोमयुक्तं फलम्।) भव्यम्। इति राजनिर्घण्टः ॥

लोमविषः, पुं, (लोम्नि विषं यस्य।) व्याघ्रादिः। इति हेमचन्द्रः ॥

लोमशः, पुं, (लोमानि सन्त्यस्येति। लोमन् + "लोमादिभ्यः शः।" इति शः।) मुनिविशेषः। (मुनिवरोऽयं तीर्थगमनाभिलाषिणः सानुजस्य युधिष्ठिरस्यानुगामी सर्व्वतीर्थवृत्तान्तमस्मै विज्ञापयामासेति महाभारते वनपर्व्वणि द्रष्टव्यम् ॥*॥) मेषः। अतिलोमान्विते, त्रि। इति मेदिनी। शे, २७ ॥ यथा,—
"कदाचिद्दन्तुरो मूर्खः कदाचिल्लोमशः सुखी ॥"
इति सामुद्रकम् ॥
(धान्यापहरणरूपकर्म्मविपाकात् लोमशो भवति। यथा, महाभारते। १३। १११। ११९।
"धान्यं हृत्वा तु पुरुषो लोमशः संप्रजायते ॥")

लोमशकाण्डा, स्त्री, (लोमशः काण्डो यस्याः।) कर्कटी। इति राजनिर्घण्टः ॥ (कर्कटीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

लोमशपर्णिनी, स्त्री, (लोमशं पर्णमस्त्यस्या इति। इनि। ङीप्।) माषपर्णी। इति शब्दचन्द्रिका ॥

लोमशपुष्पकः, पुं, (लोमशानि पुष्पाणि यस्य। कप्।) शिरीषवृक्षः। इति राजनिर्घण्टः ॥

लोमशमार्ज्जारः, पुं, (लोमशो लोमबहुलो मार्ज्जारः।) मार्जारविशेषः। गन्धनकुला।